सहीका हारहरा च गौस्तनी चापि
कीर्त्तिता ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

स्वादुमज्जा, [न्]पुं, ( स्वादु मज्ज यस्य । ) पर्व्वतपीलुः । इति जटाधरः ॥

स्वादुमांसी, स्त्री, ( स्वादु मांसं अन्तःशस्यं यस्याः । ङीप् । ) काकोली । इति राजनिर्घण्टः ॥
( गुणादयोऽस्याः काकोलीशब्देऽभिहिताः ॥)

स्वादुमूलं, क्ली, ( स्वादु मूलं यस्य । ) गर्ज्जरम् । इति राजनिर्घण्टः ॥

स्वादुरसा, स्त्री, (स्वादुः रसो यस्याः ।) काकोली । इत्यमरः । २ । ४ । १४ ॥ आम्रातकफलम् । इति शब्दरत्नावली ॥ मदिरा । इति हेमचन्द्रः ॥ शतावरी । इति राजनिर्घण्टः । द्राक्षा । इति केचित् ॥

स्वादुलता, स्त्री, ( स्वादुः लता । ) विदारी । इति राजनिर्घण्टः ॥

स्वादुशुद्धं, क्ली, ( स्वादु शुद्धञ्चेति ।) सैन्धवलवणं सामुद्रलवणं वा । इति केचित् ॥

स्वाद्वम्लः, पुं, ( स्वादुरम्लरसो यत्र । ) दाड़िमवृक्षः । इति त्रिकाण्डशेषः ॥

स्वाद्वी, स्त्री, ( स्वादु+“वोतो गुणवचनात् ।” ४ । १ । ४५ । इति ङीष् । ) द्राक्षा । इत्यमरः । २ । ४ । १०७ ॥

स्वाधिष्ठानं, क्ली, ( स्वं लिङ्गं तत्र अधिष्ठानं यस्य । स्वस्य लिङ्गस्य अधिष्ठानं यस्मात् इति वा । स्वशब्देन परं लिङ्गं स्वाधिष्ठानं ततो विदुरित्युक्तेस्तथात्वम् । ) षट्चक्रान्तर्गतद्वितीयचक्रम् । तत्तु लिङ्गमूलस्थवादिलान्तवर्णयुक्तहीरकसमप्रभषड्दलपद्मम् । अत्र शिवाग्नी वर्त्तेते । यथा,—
“षड्दले वैद्युतनिभे स्वाधिष्ठानेऽनलत्विषि ।
व-भ-मैर्य-र-लैर्युक्ते वर्णैः षड्भिश्च सुव्रत ॥”
अपि च ।
“स्वाधिष्ठानाख्यचक्रे तु सबिन्दुं राकिणीं तथा ।
वादिलान्तं प्रविन्यस्य नाभौ तु मणिपूरके ॥”
इति तन्त्रसारः ॥
अन्यच्च ।
“सिन्दूरपूररुचिरारुणपद्ममन्यत्
सौषुम्नमध्यघटितं ध्वजमूलदेशे ।
अङ्गच्छदैः परिवृतं तड़िताभवर्ण-
र्व्वाद्यैः सबिन्दुलसितैश्च पुरन्दरान्तैः ॥
तस्यान्तरे प्रविलसद्विशदप्रकाश-
मम्भोजमण्डलमथो वरुणस्य तस्य ।
अर्द्धेन्दुरूपलसितं शरदिन्दुशुभ्रं
वङ्कारबीजममलं मकराधिरूढ़म् ॥
तस्याङ्कदेशलसितो हरिरेव पाया-
न्नीलप्रकाशरुचिरश्रियमादधानः ।
पीताम्बरः प्रथमयौवनगर्व्वधारी
श्रीवत्सकौस्तुभधरो धृतवेदबाहुः ॥
तत्रैव भाति सततं खलु राकिणी सा
नीलाम्बुजातरुचिसहोदरकान्तिशोभा
नानायुधोद्यतकरैर्ललिताङ्गलक्ष्मी-
र्दिव्याम्बराभरणभूषितमत्तचित्ता ॥
स्वाधिष्ठानाख्यमेतत् सरसिजममलं चिन्तयेद्यो
मुनीन्द्र-
स्तस्याहङ्कारदोषादिकसकलरिपुः क्षीयते
तत्क्षणेन ।
योगीशः सोऽपि मोहाद्भुततिमिरचये भानु-
तुल्यप्रकाशो
गद्यैः पद्यैः प्रबन्धैर्विरचयति सुधाकाव्यसन्दोह-
लक्ष्मीम् ॥”
इति पूर्णानन्दगिरिकृतषट्चक्रक्रमः ॥

स्वाधीनः, त्रि, ( स्वस्य अधीनः । ) स्वतन्त्रः । अपराधीनः । यथा,—
“स्वाधीनवृत्तेः साफल्यं न पराधीनवृत्तिता ।
ये पराधीनकर्म्माणो जीवन्तोऽपि च ते
मृताः ॥”
इति गारुड़े । ११५ । ३७ ॥

स्वाधीनपतिका, स्त्री, नायिकाविशेषः । तस्या लक्षणं यथा । स्वाधीनः पतिर्यस्याः सा स्वाधीनपतिका । सदाज्ञाकरप्रियतमा । अस्याश्चेष्टा वनविहारादिमदनोत्सवदर्शनं मदाहङ्कारमनोरथावाप्तिप्रभृतयः । सा पञ्चविधा । मुग्धा मध्या प्रौढ़ा परकीया सामान्या चेति । मुग्धा स्वाधीनपतिका यथा,—
“मध्ये नो कृशिमा स्तने न गरिमा देहे न वः
कान्तिमा
श्रोणौ न प्रथिमा गतौ न जड़िमा नेत्रे न वा
वक्रिमा ।
लास्ये न द्रढ़िमा न वाचि पटिमा हास्ये न
वा स्फीतिमा
प्राणेशस्य तथापि मज्जति मनो मय्येव किं
कारणम् ॥ १ ॥
मध्या स्वाधीनतपतिका यथा,—
यदपि रतिमहोत्सवे नकारो
यदपि करेण च नीविधारणानि ।
प्रियसखि पतिरेव पार्श्वदेशं
तदपि न मुञ्चति चेत् किमाचरामि ॥२॥
प्रौढ़ा स्वाधीनपतिका यथा,—
वक्तस्याधरपल्लवस्य वचसो हास्यस्य लास्यस्य
वा
धन्यानामरविन्दसुन्दरदृशां कान्तस्तनोति
स्तुतिम् ।
स्वप्नेष्वपि न गच्छति स्मृतिपथं चेतःपथं दृक्पथं
काप्यन्या दयितस्य मे सखि कथं तस्यास्तु
भेदग्रहः ॥३॥
परकीया स्वाधीनपतिका यथा,—
स्वीयाः सन्ति गृहे सरोरुहदृशो यासां विलास-
क्षणं
कामौत्सुक्यकलैकवल्लभचमत्कारो न विश्रा-
म्यति ।
को हेतुः सखि कानने पुरपथे वीथे सखी-
सन्निधौ
भ्राम्यन्तीमपि पल्लवस्य परितो दृष्टिर्न मां
मुञ्चति ॥४॥
सामान्या स्वाधीनपतिका यथा,—
सन्त्येव प्रतिमन्दिरं मृगदृशो यासां सुधा-
सागर-
स्रोतःसूतसरोजसुन्दरचमत्कारा दृशो-
विभ्रमाः ।
चित्रं किन्तु विचित्रमन्मथकलावैदग्ध्यहेतोः पुन-
र्वित्तं चित्तहरं प्रयच्छति युवा मय्येव किं
कारणम् ॥”५॥
इति रसमञ्जरी ॥

स्वाधीनभर्त्तृका, स्त्री, ( स्वस्या निजायाः अधीनो भर्त्ता यस्याः । कप् । )स्वाधीनपतिका । सा च नायिकाभेदः ॥ यथा,—
“खण्डितोत्कण्ठिता लब्धा तथा प्रोषितभर्त्तृका ।
कलहान्तरिता वासकसज्जा स्वाधीनभर्त्तृका ॥”
इति जटाधरः ॥
( तल्लक्षणं यथा, साहित्यदर्पणे । ३ । ११२ ।
“कान्तो रतिगुणाकृष्टो न जहाति यदन्तिकम् ।
विचित्रविभ्रमासक्ता सा स्यात् स्वाधीन-
भर्त्तृका ॥”)

स्वाध्यायः, पुं, (सुष्ठु आवृत्य अध्यायः वेदाध्ययनमिति ।) आवृत्य वेदाध्ययनम् । तत्पर्य्यायः । जपः २ । इत्यमरः । २ । ७ । ४७ ॥ जापः ३ । इति जटाधरः ॥
“स्वाध्यायो जप इत्युक्तो वेदाध्ययनकर्म्मणि ।”
इति शब्दरत्नावली ॥
ङे आवृत्य वेदाध्ययने । सु सुष्ठुतया आवृत्य अध्यायोऽधीतिः स्वाध्यायः इङो घञ् । जपनं जपः अल् घञि जापश्च । इति भरतः ॥

स्वाध्यायवान्, [ त् ] पुं, ( स्वाध्यायोऽस्यास्तीति । मतुप् । मस्य वः । ) स्वाध्यायविशिष्टः । वेदपाठकः । ( यथा, महाभारते ।१।४०।१० ।
“स ऊर्द्ध्वरेतास्तपसि प्रसक्तः
स्वाध्यायवान् वीतभयः कृतात्मा ।
चचार सर्व्वां पृथिवीं महात्मा
न चापि दारान् मनसाप्यकाङ्क्षत ॥”)

स्वाध्यायी, [ न् ] पुं, स्वाध्यायोऽस्यास्तीति । इनिः । ) यत्नवणिक् । इति त्रिकाण्डशेषः ॥ त्रि, वेदपाठकश्च ॥ ( यथा, महाभारते ।३ । २४ । १५ ।
“ब्राह्मणाः साग्निहोत्राश्च तथैव च निरग्नयः ।
स्वाध्यायिनो भिक्षवश्च तथैव वनवासिनः ॥”)

स्वानः, पुं, ( स्वननमिति । स्वन शब्दे+“स्वनहसोर्वा ।”३ । ३ । ६२ । इति घञ् । ) शब्दः । इत्यमरः ।१ ।७ । २४ ॥ ( यथा, माघे ।४।५७ ।
“या बिभर्त्ति कलवल्लकी गुण-
स्वानमानमतिकालिमालया ।
नात्र कान्तमुपगीतया तया
स्वानमानमति कालिमालया ॥”)

स्वान्तं, क्ली, ( स्वन्यते स्मेति । स्वन+क्त । “क्षुब्धस्वान्तध्वान्तेति ।” ७ । २ । १८ । इति अनिट्